# દશમયીબાલાત્રિપુરસુન્દરીસ્તોત્રમ્

dashamayIbAlAtripurasundarIstotram

sanskritdocuments.org

May 13, 2018

# dashamayIbAlAtripurasundarIstotram

# દશમયીબાલાત્રિપુરસુન્દરીસ્તોત્રમ્

## Sanskrit Document Information

Text title : dashamayIbAlAtripurasundarIstotram

File name : dashamayIbAlAtripurasundarIstotram.itx

Category : devii, rAmAnujasampradAya, dashamahAvidyA

Location : doc_devii

Proofread by : PSA Easwaran psawaswaran at gmail.com

Acknowledge-Permission: Shri Tripursundari Ved Gurukulam, Sahibabad (Ghaziabad), UP

Latest update : March 24, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 13, 2018

*sanskritdocuments.org*

# દશમયીબાલાત્રિપુરસુન્દરીસ્તોત્રમ્

શ્રીકાલી બગલામુખી ચ લલિતા ધૂમાવતી ભૈરવી
માતઙ્ગી ભુવનેશ્વરી ચ કમલા શ્રીવજ્રવૈરોચની ।
તારા પૂર્વમહાપદેન કથિતા વિદ્યા સ્વયં શમ્ભુના
લીલારૂપમયી ચ દેશદશધા બાલા તુ માં પાતુ સા ॥ ૧॥

શ્યામાં શ્યામઘનાવભાસરુચિરાં નીલાલકાલઙ્કૃતાં
બિમ્બોષ્ઠીં બલશત્રુવન્દિતપદાં બાલાર્કકોટિપ્રભામ્ ।
ત્રાસત્રાણકૃપાણમુણ્ડદધતીં ભક્તાય દાનોદ્યતાં
વન્દે સઙ્કટનાશિનીં ભગવતીં બાલાં સ્વયં કાલિકામ્ ॥ ૨॥

બ્રહ્માસ્ત્રાં સુમુખીં બકારવિભવાં બાલાં બલાકીનિભાં
હસ્તન્યસ્તસમસ્તવૈરિરસનામન્યે દધાનાં ગદામ્ ।
પીતાં ભૂષણગન્ધમાલ્યરુચિરાં પીતામ્બરાઙ્ગાં વરાં
વન્દે સઙ્કટનાશિનીં ભગવતીં બાલાં ચ બગલામુખીમ્ ॥ ૩॥

બાલાર્કશ્રુતિભસ્કરાં ત્રિનયનાં મન્દસ્મિતાં સન્મુખીં
વામે પાશધનુર્ધરાં સુવિભવાં બાણં તથા દક્ષિણે ।
પારાવારવિહારિણીં પરમયીં પદ્માસને સંસ્થિતાં
વન્દે સઙ્કટનાશિનીં ભગવતીં બાલાં સ્વયં ષોડશીમ્ ॥ ૪॥

દીર્ઘાં દીર્ઘકુચામુદગ્રદશનાં દુષ્ટચ્છિદાં દેવતાં
ક્રવ્યાદાં કુટિલેક્ષણાં ચ કુટિલાં કાકધ્વજાં ક્ષુત્કૃશામ્ ।
દેવીં શૂર્પકરાં મલીનવસનાં તાં પિપ્પલાદાર્ચિતામ્ ।
બાલાં સઙ્કટનાશિનીં ભગવતીં ધ્યાયામિ ધૂમાવતીમ્ ॥ ૫॥

ઉદ્યત્કોટિદિવાકરપ્રતિભટાં બાલાર્કભાકર્પટાં
માલાપુસ્તકપાશમઙ્કુશધરાં દૈત્યેન્દ્રમુણ્ડસ્રજામ્ ।
પીનોત્તુઙ્ગપયોધરાં ત્રિનયનાં બ્રહ્માદિભિઃ સંસ્તુતાં
બાલાં સઙ્કટનાશિનીં ભગવતીં શ્રીભૈરવીં ધીમહિ ॥ ૬॥

વીણાવાદનતત્પરાં ત્રિનયનાં મન્દસ્મિતાં સન્મુખીં
વામે પાશધનુર્ધરાં તુ નિકરે બાણં તથા દક્ષિણે ।
પારાપારવિહારિણીં પરમયીં બ્રહ્માસને સંસ્થિતાં
વન્દે સઙ્કુટનાશિનીં ભગવતીં માતઙ્ગિનીં બાલિકામ્ ॥ ૭॥

ઉદ્યત્સૂર્યનિભાં ચ ઇન્દુમુકુટામિન્દીવરે સંસ્થિતાં
હસ્તે ચારુવરાભયં ચ દધતીં પાશં તથા ચાઙ્કુશમ્ ।
ચિત્રાલઙ્કૃતમસ્તકાં ત્રિનયનાં બ્રહ્માદિભિઃ સેવિતાં
વન્દે સઙ્કુટનાશિનીં ચ ભુવનેશીમાદિબાલાં ભજે ॥ ૮॥

દેવીં કાઞ્ચનસન્નિભાં ત્રિનયનાં ફુલ્લારવિન્દસ્થિતાં
વિભ્રાણાં વરમબ્જયુગ્મમભયં હસ્તૈઃ કિરીટોજ્જ્વલામ્ ।
પ્રાલેયાચલસન્નિભૈશ્ચ કરિભિરાસિઞ્ચ્યમાનાં સદા
બાલાં સઙ્કુટનાશિનીં ભગવતીં લક્ષ્મીમ્ભજે ચેન્દિરામ્ ॥ ૯॥

સચ્છિન્નાં સ્વશિરોવિકીર્ણકુટિલાં વામે કરે વિભ્રતીં
તૃપ્તાસ્યસ્વશરીરજૈશ્ચ રુધિરૈઃ સન્તર્પયન્તીં સખીમ્ ।
સદ્ભક્તાય વરપ્રદાનનિરતાં પ્રેતાસનાધ્યાસિનીં
બાલાં સઙ્કુટનાશિનીં ભગવતીં શ્રીછિન્નમસ્તાં ભજે ॥ ૧૦॥

ઉગ્રામેકજટામનન્તસુખદાં દૂર્વાદલાભામજાં
કર્ત્રીખડ્ગકપાલનીલકમલાન્ હસ્તૈર્વહન્તીં શિવામ્ ।
કણ્ઠે મુણ્ડસ્રજાં કરાલવદનાં કઞ્જાસને સંસ્થિતાં
વન્દે સઙ્કુટનાશિનીં ભગવતીં બાલાં સ્વયં તારિણીમ્ ॥ ૧૧॥

મુખે શ્રીમાતઙ્ગી તદનુ કિલ તારા ચ નયને
તદન્તરગા કાલી ભૃકુટિસદને ભૈરવિ પરા ।
કટૌ છિન્ના ધૂમાવતી જય કુચેન્દૌ કમલજા
પદાંશે બ્રહ્માસ્ત્રા જયતિ કિલ બાલા દશમયી ॥ ૧૨॥

વિરાજન્ મન્દારદ્રુમકુસુમહારસ્તનતટી
પરિત્રાસત્રાણાસ્ફટિકગુટિકાપુસ્તકવરા ।
ગલે રેખાસ્તિસ્રો ગમકગતિગીતૈકનિપુણા
સદાપીલાહાલા જયતિ કિલ બાલા દશમયી ॥ ૧૩॥

ઇતિ શ્રીમેરુતન્ત્રે દશમયીબાલાત્રિપુરસુન્દરીસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

---

*dashamayIbAlAtripurasundarIstotram*

pdf was typeset on May 13, 2018

Please send corrections to *sanskrit@cheerful.com*